# .. Navaratnamala by Kalidas ..

## ॥ नवरत्नमाला कालिदासविरचितम् ॥

ओङ्कारपञ्जरशुकीमुपनिषदुद्यानकेलिकलकण्ठीम् ।
आगमविपिनमयूरीमार्यामन्तर्विभावये गौरीम् ॥ १॥
दयमानदीर्घनयनां देसिकरूपेणदर्शिताभ्युदयाम् ।
वामकुचनिहितवीणां वरदां सङ्गीतमातृकां वन्दे ॥ २॥
श्यामलिमसौकुमार्यां सौन्दर्यानन्दसंपदुन्मेषाम् ।
तरुणिमकरुणापूरां मदजलकल्लोललोचनां वन्दे ॥ ३॥
नखमुखमुखरितवीणानादसास्वादनवनवोल्लासाम् ।
मुखमम्ब मोदयतु मां मुक्ताताटङ्कमुग्धहसितं ते ॥ ४॥
सरिगमपधनिरतां तां वीणासङ्क्रान्तहस्तां ताम् ।
शान्तां मृदुलस्वान्तां कुचभरतान्तां नमामि शिवकान्ताम् ॥ ५॥
अवटुतटघटितचूलीताडिततालीपलाशताटङ्काम् ।
वीणावादनवेलाकम्पितशिरसं नमामि मातङ्गीम् ॥ ६॥
वीणारवानुषङ्गं विकचमुखाम्भोजमाधुरीभृङ्गम् ।
करुणापूरतरङ्गं कलये मातङ्गकन्यकापाङ्गम् ॥ ७॥
मणिभङ्गमेचकाङ्गीं मातङ्गीं नौमि सिद्धमातङ्गीम् ।
यौवनवनसारङ्गीं सङ्गीताम्भोरुहानुभवभृङ्गीम् ॥ ८॥
मेचकमासेचनकं मिथ्यादृष्टान्तमध्यभागं ते ।
मातस्वरूपमनिशं मङ्गलसङ्गीतसौरभं वन्दे ॥ ९॥

Encoded and proofread by Sunder Hattangadi sunderh@hotmail.com

Please send corrections to sanskrit@cheerful.com
Last updated October 27, 2008